भक्तदुष्टवैभवनाशकाय नमः ॥१॥
भक्तसंकटनिवारकाय नमः ॥२॥
वृकादिदुष्टघातकाय नमः ॥३॥
ब्रह्मशिवादिवंदितचरणाय नमः ॥४॥
सर्वोत्कर्षबोधकाय नमः ॥५॥
विप्रमृतापत्यदात्रे नमः ॥६॥
अर्जुनादिगर्वापहारकाय नमः ॥७॥
नानाविलासविलसन्मुखाय नमः ॥८॥
निखिलनिजजनप्रपंचविस्मारकाय नमः ॥९॥
इत्येवं राजलीलाया नाम्नामष्टोत्तरं शतम् ।
निरोधलीलामाश्रित्य भक्त्यै भक्तेन रूपितम् ॥१॥
बाललीलानामपाठाच्छ्रीकृष्णे प्रेम जायते ।
आसक्तिः प्रौढलीलाया नाम्नां पाठाद्भविष्यति ॥२॥
व्यसनं कृष्णचरणे राजलीलाविधानतः ।
तस्मान्नामत्रयं जाप्यं भक्तिप्रासीच्छुभिः सदा ॥१॥
इति श्रीवल्लभाचार्यविरचिता त्रिविधलीलानामावली संपूर्णा ।

# अथ श्रुतिगीता ।

श्रीकृष्णाय नमः ।

प्राकृताः श्रुतयः सर्वा भगवंतमधोक्षजम् ।
स्तुवंति दोषनाशाय तत्राविष्टो भवेद्यया ॥ १ ॥

सत्यो हरिः समस्तेषु भ्रमभातेष्वपि स्थिरः।
अतः संतः समस्तार्थे कृष्णमेव विजानते ॥ २ ॥
कथानंत्योक्तिहृदयाः साधनानि न कुर्वते।
साक्षाद्ये पादसंश्लिष्टास्ते किं वाच्या महाशयाः ॥३॥
कृष्ण एव सदा सेव्यो निर्णीतः पंचधा बुधैः।
शरीरदः प्रेरकश्च सुखदः शेषसत्पदः ॥ ४ ॥
कर्मरूपं हरिं केचित्सेवंते योगरूपिणम्।
तेभ्योऽप्यक्षररूपस्य सेवकाः संमताः सताम् ॥ ५ ॥
सर्वत्र भगवांस्तुल्यः सर्वदोषविवर्जितः।
क्रीडार्थमनुकुर्वन्हि सर्वत्रैव विराजते ॥ ६ ॥
गुप्तानंदा यतो जीवा निरानंदं जगद्यतः।
पूर्णानंदो हरिस्तस्माज्जीवैः सेव्यः सुखार्थिभिः ॥७॥
कृष्णे हरौ भगवति परमानंदसागरः।
वर्तते नात्र संदेहः कथा तत्र नियामिका ॥ ८ ॥
असत्संगो न कर्तव्यो भक्तिमार्गस्य बाधकः।
देहे ह्यनुगुणे कृष्णे नेंद्रियाणां प्रियं चरेत् ॥ ९ ॥
सर्व एव हरेर्भक्तास्तुल्या यान्मन्यते हरिः।
अतः कृष्णो यथात्मीयान्मन्यते भजनं तथा ॥ १० ॥
ज्ञानमार्गो भ्रांतिमूलस्ततः कृष्णं भजेद्बुधः।
प्रवर्तकं ज्ञानकांडं चित्तशुद्ध्यै यतो भवेत् ॥ ११ ॥

भ्रांतिमूलतया सर्वसमयानामयुक्तितः ।
न तद्विरोधात्कृष्णाख्यं परं ब्रह्म त्यजेद्बुधः ॥ १२ ॥
जीवानां ब्रह्मरूपत्वाद्दोषा अपि च मानसाः ।
जगच्च सकलं ब्रह्म ततो दोषः कथं हरौ ॥ १३ ॥
सर्वथा सर्वतः शुद्धा भक्ता एव न चापरे ।
अतः शुद्धिमभीप्सद्भिः सेव्या भक्ता न चापरे ॥१४॥
सुवर्णप्रतिमेवासौ सर्वानंदमयोऽधिराट् ।
सर्वसेव्यो नियंता च निर्दुष्टः सर्वथैव हि ॥ १५ ॥
सर्वभावविनिर्मुक्तः पूर्णः क्रीडार्थमुद्गतः ।
निमित्तं तं समाश्रित्य जायंते जीवराशयः ॥ १६ ॥
नियंता जीवसंघस्य हरिस्तेनाणवो मताः ।
जीवा न व्यापकाः क्वापि चिन्मयाज्ञानिना मताः॥१७॥
नामरूपप्रपंचं हि देवतिर्यङ्नरात्मकम् ।
कृष्णादेव समुद्भूतं लीनं तत्रैव तन्मयम् ॥ १८ ॥
नृणां दुर्गतिमालोक्य ये सेवंते दृढव्रताः ।
कृष्णं तद्भ्रूकुटिः कालो न तान् हंति कदाचन ॥१९॥
अदांते मनसि ज्ञानयोगार्थं न यतेद्बुधः ।
गुरुसेवापरो भूत्वा भक्तिमेव सदाभ्यसेत् ॥ २० ॥
सर्वलोकोपकारार्थं कृष्णेन सहितास्तु ते ।
परिभ्रमंति लोकानां निस्ताराय महाशयाः ॥ २१ ॥

पुत्रादीन्संपरित्यज्य कृष्णः सेव्यो न तैः सह ।
तत्सुखं भगवान् दाता ते तु क्लिष्टेऽतिदुःखदाः॥२२॥
परिभ्रमंस्तीर्थनिष्ठो गुरुलब्धहरिस्मृतिः ।
न सेवेत गृहान् दुष्टान् सद्धर्मात्यंतनाशकान् ॥२३॥
सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत् ।
भ्रांत्या सद्बुद्धिरत्रेति संतं कृष्णं भजेद्बुधः ॥२४॥
खपुष्पादिसमत्वाद्धि मिथ्याभूतं जगद्यतः ।
अधिष्ठानाच्च सद्भानं तं कृष्णं नियतं भजेत् ॥२५॥
कालादितृणपर्यंता न सेव्यामुक्तिमिच्छता ।
दोषत्याजनशक्तो हि सेव्यो दाता गुणस्य च ॥२६॥
जीवेषु भगवानात्मा संच्छन्नस्तेन तत्र न ।
भजनं सर्वथा कार्यं ततोऽन्यत्रैव पूजयेत् ॥ २७ ॥
सुखसेवापरो यस्तु सदानंदं हरिं भजेत् ।
अन्यथा सुखसंप्रेप्सुः सर्वथा दुःखमाप्नुयात् ॥ २८ ॥
कृष्णानंदः परानंदो नान्यानंदस्तथाविधः ।
वेदा अपि न तच्छक्ताः प्रतिपादयितुं स्वतः ॥ २९ ॥
इत्येवं श्रुतिगीतायाः संक्षेपेण निरूपितः ।
अर्थराशिसमुद्रो हि यथांगुल्या निरूप्यते ॥ ३० ॥

इति श्रीवल्लभाचार्यविरचिता श्रुतिगीता संपूर्णा ।